भूते यवेनार्द्धरात्रे जन्मश्रवणात् तत्रैव पूजा मुख्येति। तथा बृहद्धर्म्मपुराणे।
"रात्रौ निशीथव्यापायाममावास्यामिहैव तु। पृथ्वीतलं समायाता काली दिग्वसनाम्बिका॥
अतस्तामत्र वै भक्त्या देवदेवीं द्विजातयः। पूजयेदात्मनो भक्त्या पशुपुष्पार्घ्यसम्पदा॥" इति तथा गुप्तसाधनतन्त्रे।
"निशा तु परमेशानि स्वल्पचाप्नमुपागते। प्रहरे च गते रात्रौ घटिके द्वे परे च ये॥
महानिशा समाख्याता ततश्चातिमहानिशा। अर्द्धरात्रे गते देवि पशुभावो न पूजयेत्॥"
अर्द्धरात्रे गते अर्द्धरात्रात् परम्। तथा।
"दशदण्डे तु या पूजा तत् सर्व्वमक्षयं भवेत्। षष्ठक्रोशे महेशानि तत् सर्व्वममृतोपमम्॥
सप्तमक्रोशके देवि सर्व्वं चौरोपमं भवेत्। अष्टमक्रोशके देवि! द्रव्यतुल्यं न संशयः॥
अतः परं महेशानि विषतुल्यं न संशयः। एतत् सर्व्वं महेशानि पशुभावे मयोदितम्॥"
अर्द्धरात्रस्य गौणत्वश्रवणात् पशूनां यत्र पूर्व्वं दिने अर्द्धरात्रव्यापिन्यमावास्या न तु तत्पूर्व्वं प्राप्तिः परदिने च रात्रेः पञ्चममुहूर्त्तव्यापिनी तदा परेद्युः पूजेति चेन्न गुप्तसाधनतन्त्रोक्तत्व च नद्य नित्यपूजार्थपरम्। कार्त्तिकामावास्याया-मर्द्धरात्रे जन्मनिमित्तकपूजाया विशेषेणाभिधानात्। पशुभिरपि एवंभूतस्थले पूर्व्वदिने-ऽर्द्धरात्र एव पूजा कार्य्या। यथा श्रीकृष्ण-पूजायाः सामान्यतो निशायामकर्त्तव्यत्वेऽपि जन्माष्टम्यामर्द्धरात्रकर्त्तव्यता मुख्यतमेति परन्तु यत्र पूर्व्वदिने अर्द्धरात्रात् परममावास्या पर-दिने अर्द्धरात्रात् पूर्व्वमेव तत्र पशुभाविनः पर दिने वीरादिव्ययोश्च पूर्व्वदिने पूजा कार्य्या इति प्रमाणं गोप्यगोपनलीलागमीयषष्ठपटले। एवं यत्र पूर्व्वदिने अर्द्धरात्रव्यापिन्यमावास्या पर-दिने तथा भूतापि कुजवारादियुक्ता तत्रापि पूर्व्वदिने पूजा गुणफलकुजवारादिकमपेक्ष्य चतु-र्द्दशीयोगस्य मुख्यत्वात्। तथोक्तं व्योमकेश-तन्त्रे
"कुजवारे लक्षगुणं पूर्व्वविद्धा ततोऽधिकेति।"
कुजवार इति शनिवारोपलक्षणम्।
"शनिभौमदिने चेत् स्यात्ततः शतगुणं फलम्।" इति श्रवणात्॥
कार्त्तिकामावास्यायां कालीपूजाया नित्यता-माह मायातन्त्रे।
'वर्षे वर्षे च कर्त्तव्यं कालिकाया महोत्सवम्। कार्त्तिके तु विशेषेण अमावास्यां निशार्द्धके॥" इति॥
देव्यागमे च।
प्रतिसंवत्सरं कुर्य्यात् कालिकाया महोत्सवम् कार्त्तिके तु विशेषेण अमावास्यां निशार्द्धके। च संपूजयेद्देवीं भोगमोक्षप्रदायिनीम्॥" इति।
एवञ्चात्र कार्त्तिकपदं गौणचान्द्रकार्त्तिकपरं जन्मतिथिकृत्यत्वात्। न तु नानावचने तुलार्क-श्रवणात् सौरकार्त्तिकपरम्। तथा सति यस्मिन् वर्षे तुलार्के रात्रौ नामावास्याप्राप्तिस्तद्वर्षे कृत्यलोपः स्यात्। एवं यत्र वर्षे तुलार्के दर्शद्वयं तत्रानध्यवसायापत्तेः। अष्टमुक्तं विद्योत्पत्तितन्त्रे
"कार्त्तिकस्याप्यमावास्या गौणचान्द्रप्रमाणतः। निशीथव्यापिनी या तु तस्यां पूजां समाचरेत्॥"
निशीथमर्द्धरात्रम्। एवं यत्र पूर्व्वदिने निशीथ-व्यापिन्यमावास्या कन्यार्के परदिने च तुलार्के-ऽर्द्धरात्रात् परं मुहूर्त्तादिव्यापिनी तत्रापि पूर्व्वदिने निशीथस्य मुख्यकालत्वानुरोधात् भूत-तिथियोगानुरोधाच्च तुलार्कस्य दिनभेदनिया-मकत्वेन श्रुतत्वात्। परन्तु तुलार्कपदं नाना-वचने यदस्ति तत्राधिकाभिप्रायेण गुणफलाभि-प्रायेण वा बोध्यम्। अतएव तिथितत्त्वधृत-मादिपुराणम्।
"ऋक्षराशिविशेषेण यत् कर्म्म विहितं नरैः। दैवं वाप्यथवा पैत्रं तदन्यत्रापि दृश्यते॥" इति।
अगस्त्यसंहितायाम्।
"मेषं पूषणि संप्राप्ते लग्ने कर्कटकाह्वये। आविरासीत् सकलया कौशल्यायां परः पुमान्॥" इति॥
अत्र मेषार्के जन्मश्रवणं मीनार्केऽपि कदाचित् उपवासः। यत्तु तन्त्रीयमिति कृत्वा पठन्ति।
"तुलार्के त्वर्द्धरात्रे या दीपयात्रा तिथिर्भवेत्। तत्र संपूजयेत् कालीं सर्व्वकामार्थसिद्धये॥
निशार्द्धे सा तिथिर्नास्ति तदधःकालसंयुता। तत्रापि पूजयेत् कालीं तुलार्कं नैव लङ्घयेत्॥"
इति तदमूलम्। समूलकत्वेऽपि तुलार्के इत्यत्र तुशब्दः कन्यार्कग्राहकः। तेन तुलार्के कन्यार्के वा इत्यर्थः। तुलार्कमात्रपरत्वे प्रतिसंवत्सर इत्यस्य बाधापत्तेरुक्तत्वात्। तुलार्कं नैव लङ्घ-येदित्यस्य तुलार्कविहितपूजां न त्यजेत् इत्यर्थः। तुलार्कविहितपूजायागौणकार्त्तिकत्वेनकर्त्तव्य-तायां विधेस्तात्पर्य्यस्योक्तत्वात्। यद्वा सर्व्वत्र तुलार्कघटितवचनेषु तुलार्कस्यामावास्यायामुप-लक्षणतयान्वयः। न तु विशेषणतया। न वा पूजायामपि तदन्वयः। तेन तुलार्कोपलक्षिता-मावास्यायां निशीथे कालीं पूजयेत् इतिविधि-स्तेनगौणचान्द्रकार्त्तिकामावास्यालाभः। तस्या-मेव तुलार्कसम्बन्धनियमात्। अन्यथा तुलाक्ष-रव्यारब्धलाभावेन कदाचित् तत्परप्रतिपदादि-दर्शान्तस्य मुख्यकार्त्तिकत्वानुपपत्तिः। मुख्य-कार्त्तिकामावास्यायाः कदाचित्तद्भिन्नके सत्त्वात् न तु तुलार्के नियमः। तथा च तुलार्कनियता-मावास्यायां निशीथे कालीं पूजयेदिति पर्य्यव-सितम्। तुलार्कं नैव लङ्घयेदित्यत्र तुलार्कपदञ्च तुलार्कोपलक्षितामावास्यापूजापरम्। संकल्प-वाक्ये तु कार्त्तिके मासीत्युल्लेख्यं न तु राश्युल्ले-खोऽपि गौणचान्द्रेण विधानात्। केचित्तु उपल-क्षणतया अमावास्यायां अन्वयतात्पर्य्येण तुलाराशिस्थे भास्करे इत्युल्लेख्यं इति भास्कर पदोत्तरसप्तम्या उपलक्षणतया तत्कालसम्बन्ध-बोधनसामर्थ्यात् इति वदन्ति॥*॥ तन्त्रान्तरे।
"तुलाराशिं गते भानौ दीपयात्रानिशासु च। पूजयेत् कालिकां देवीं धर्म्मकामार्थसिद्धये॥"
तन्त्रे।
"अर्द्धरात्रात् पुरस्तात्तु यावद्दे घटिकाद्वयम्। सा महारात्रिरुद्दिष्टा यद्दत्तमक्षयं भवेत॥
महानिशाच विज्ञेया अर्द्धरात्रात् परं शिवे। नाडीचतुष्टयं शस्तं तत्र पूजा महाफला॥"
विद्योत्पत्तितन्त्रे।
"दीपोत्सवचतुर्द्दश्याममायायोग एव च। कालरात्रिर्महेशानि काली तारा प्रियङ्करी॥"
ज्ञानार्णवे।
"महारात्रावमावास्यां दक्षिणायाः प्रपूजनम्। कार्त्तिके मासि सुश्रोणि कालीप्रीतिकरं परम्॥
तत्रापि च निशीथे तन्महासिद्धिप्रदं नृणाम्। निशीथात् परतो देवि यत्तु नाडीचतुष्टयम्॥
सा महारात्रिरुत्कृष्टा तत्र पूजा महाफला। तारतम्येन देवेशि पूजायाः फलकल्पनम्॥"
कुलार्णवेऽपि।
"भूतयुक्ता महेशानि महारात्री तु या कुहूः। सा कालरात्रिरुद्दिष्टा कालीतारा प्रियङ्करी॥
तत्र पूजा तयोः कार्य्या नानापशुविहिंसनम्। बलिदानं बलितायावात्मनाशकरं शिवे!॥"
कुलचूडामणौ।
"तिथिभ्यः शतगुणं पर्व्व दर्शः कोटिगुणोत्तरः। फलोपचारबहुलैर्ज्येष्ठे सूर्य्येन्दुसङ्गमे।
पूजयित्वा महाकालीं नरो निर्व्वाणमृच्छति॥ चतुर्व्वर्गप्रदं दर्शे कार्त्तिके कालिकार्च्चनम्।
अनन्तफलदं तत्र पर्व्वयुक्ते च पर्व्वणि॥ निशार्द्धे पूजयेद्देवीं नृमुण्डां मुण्डमालिनीम्।
पञ्चाजभिन्नौरवे घोरे सर्व्वप्राणिभयङ्करे॥"
कालीकुलसद्भावे।
"दीपोत्सवचतुर्द्दश्या संमिश्रा या भवेत् कुहूः। तस्यां या तामसी रात्रिः सोच्यते काल-रात्रिका॥
तस्यां पूजा प्रकर्त्तव्या काली तारा प्रियङ्करी॥ तुलामकरमेषेषु कन्यायां मिथुने तथा।
भूतविद्धाप्यमावास्या पूज्या भवति यत्नतः॥"
इति जीमूतवाहनकृतधर्म्मरत्ने कालविवेकधृत हारीतवचनम्॥*॥ शिवरात्रिप्रकरणे देव-लोकमहानिशा यथा;—
"महानिशे द्वे घटिके रात्रेर्मध्यमयामयोः॥"
इति गङ्गामाहात्म्यप्रकरणे स्टहस्यरत्नाकर-धृता तु।
"महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम्। तत्र स्नानं न कुर्व्वीत नित्यनैमित्तिकादृते॥"
ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे।
"षण्मुहूर्त्ते व्यतीते तु रात्रावेव महानिशा।"
कृत्यतत्त्वार्णवे बौधायनः।
"महानिशा तु विज्ञेया मध्यं मध्यमयामयोः॥"